# naivedyanivedanamantrAH

# नैवेद्यनिवेदनमन्त्राः

## Document Information

Text title : naivedyanivedanamantrAH

File name : naivedyanivedanamantrAH.itx

Category : misc, mantra

Location : doc_z_misc_general

Transliterated by : Jonathan Wiener wiener78 at sbcglobal.net

Proofread by : Jonathan Wiener wiener78 at sbcglobal.net, NA

Latest update : January 1, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

December 22, 2023

*sanskritdocuments.org*

# नैवेद्यनिवेदनमन्त्राः

ततो नैवेद्यम् ।
ॐ अमृतेशमुद्रयाऽमृतीकृत्य अमृतमस्तु । अमृतायता नैवेद्यं सावित्राणि सावित्र्यस्य देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे । महागणपतये कुमाराय श्रियै सरस्वत्यै लक्ष्म्यै विश्वकर्मणे द्वारदेवताभ्यः । प्रजापतये ब्रह्मणे कलशदेववताभ्यः ब्रह्माविष्णुमहेश्वरदेवताभ्यः । चतुर्वेदेश्वराय सानुचराय ऋतुपतये नारायणाय । दुर्गायै त्र्यम्बकाय वरुणाय यज्ञपुरुषाय अग्निष्वात्तादिभ्यः पितृगणदेवताभ्यः । भगवते वासुदेवाय लक्ष्मीसहिताय नारायणाय । भवाय देवाय पार्वतीसहिताय परमेश्वराय । विनायकाय वल्लभासहिताय महागणेशाय । क्लीं कां कुमाराय सेनाधिपतये कुमाराय । ह्रांह्रींसः सूर्याय प्रभासहिताय आदित्याय । भगवत्यै अमायै कामायै चार्वङ्ग्यै टङ्कधारिण्यै तारायै पार्वत्यै यक्षिण्यै श्रीशारिकाभगवत्यै सहस्रनाम्न्यै देव्यै भवान्यै । अभयङ्कर्यै भगवत्यै । क्षेमङ्कर्यै भवान्यै । सुरशत्रुघातिन्यै । इहराष्ट्राधिपतये भैरवाय । इन्द्रादिभ्यो दशलोकपालेभ्यः । अनन्तादिभ्य अष्टाभ्यः कुलनागदेवताभ्यः । आदित्यादिभ्य एकादश ग्रहेभ्यः । ब्रह्मणे कूर्माय ध्रुवाय अनन्ताय हरये लक्ष्म्यै कमलायै । शिक्षादिभ्यः पञ्चचत्वारिंशद्वास्तुष्पतियागदेवताभ्यः । ब्राह्म्यादिभ्यो मातृभ्यः । गौर्यादिभ्यो मातृभ्यः । ललितादिभ्यो मातृभ्यः । दुर्गाक्षेत्रगणेश्वरदेवताभ्यः । राकादेवताभ्यः । त्रिकादेवताभ्यः सिनीवालीदेवताभ्यः कुहूदेवताभ्यः यामीदेवताभ्यः रौद्रीदेवताभ्यः ऐन्द्रीदेवताभ्यः वारुणीदेवताभ्यः बार्हस्पत्यदेवताभ्यः ॥ ॐ भूर्देवताभ्यः ॐ भुवर्देवताभ्यः ॐ स्वर्देवताभ्यः ॐ भूर्भुवःस्वर्देवताभ्यः

अखण्डब्रह्माण्डयागदेवताभ्यः धूर्भ्यः उपधूर्भ्यः
महागायत्र्यै सावित्र्यै सरस्वत्यै ॥ उत्पन्नमऽमृतं दिव्यं
प्राक्क्षीरोदधिमन्थनात् । अन्नममृतरूपेण नैवेद्यं प्रतिगृह्यताम् ।
ॐ तत्सद्ब्रह्माद्यतावत्तिथावद्यामुकमासस्यामुकपक्षस्य तिथावमु-
(?)यामात्मनो वाङ्मनःकायोपार्जितपापनिवारणार्थं श्रीनारायणप्रीत्यर्थं
नमो नैवेद्यं निवेदयामि नमः ॥ आका(?)मातृभ्योऽन्नं नमः ।
समालभन्नं गन्धो नमः । अर्घो नमः पुष्पं नमः ।
योऽस्मिन्निवसति क्षेत्रे क्षेत्रपालः (?)र्किंकरः । तस्मै
निवेदयाम्यद्य बलिं पानीयसंयुताम् ॥ (?) क्षेत्राधिपतयेऽन्नं
नमः । रां राष्ट्राधिपतयेऽन्नं नमः । अभयवरप्रद मयि पुष्टिं
पुष्टिपतिर्ददातु ॥

इति निवेदनमन्त्राः ॥

Proofread by Jonathan Wiener wiener78 at sbcglobal.net, NA

*naivedyanivedanamantrAH*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*